# रम्यसंस्कृतम् । सङ्ख्याविशेषणानि – २ ।

## संवादम् इमं पठत ।



मातामही – एकत: चतु:पर्यन्तं सङ्ख्यारूपाणि अधीतानि खलु ?
पश्चत: तु सङ्ख्यारूपेषु न लिङ्गभेद: । ता: यथावत् प्रयोक्तव्या: ।

वेणु: – ज्ञातम् । तर्हि पञ्च आसन्दा:, पञ्च अङ्कन्य: पञ्च भवनानि वा ।

सुधेन्दु: – तथा च सप्त बटव:, सप्त रज्जव:, सप्तैव च दिनानि ।

पृथा – इतोऽपि अष्ट तारका:, अष्ट मुनय:, अष्ट वसूनि ।

मातामही – उत्तमम् । काश्चन सङ्ख्या: प्रसिद्धा: । यथा नव रात्रय: ...

वेणु: च पृथा च – सप्त ऋषय:, दश आननानि, अष्ट लक्ष्म्य:... त्रीणि भुवनानि, नव रत्नानि वा ।

मातामही – पर्याप्तम् । अहम् अधुना कूटप्रश्नं वदामि । **भि: – भ्य: – भ्य: – आनाम् – सु ।** किम् एतद् ?

सुधेन्दु:– (उच्चै: हसित्वा) न एष: कूटप्रश्न: । एते तु विभक्तिप्रत्यया: । गतवर्षे अहं पठितवान् सम्यक् स्मरामि अधुना अपि ।

वेणु: – ओहो सुधेन्दो ! सत्यमेव तीक्ष्णा जाता तव बुद्धि: । तर्हि एते सङ्ख्याप्रत्यया: तृतीयात: सप्तमीपर्यन्तम् ।

पृथा– यथा – **पञ्च, पञ्च, पञ्चभि:, पञ्चभ्य:, पञ्चभ्य:, पञ्चानाम्, पञ्चसु** । पश्चत: नवदशपर्यन्तं रूपाणि पञ्च सङ्ख्या इव भवन्ति । सत्यं खलु ?

मातामही – आम्, अतीव मुदिताऽस्मि । यूयं सर्वे संस्कृतपटव: । इत:परं संस्कृतभाषया खेलितुं समर्था: ।

सुधेन्दु:– तत्तु त्वया सह सम्भाषणेन किञ्चिद् व्याकरणाभ्यासेन च ।

वेणु: – सङ्ख्यारूपाणि सम्यगधीत्य सम्भाषणे सङ्ख्यानाम् अधिकं प्रयोगं कुर्म: ।

पृथा – अग्रिमे अवकाशे अन्यान् सङ्ख्याविशेषान् ज्ञातुम् आगच्छाम: ।

सम्भाषापत्रम्



## सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत ।

१. तत्र ______ (५) बालकेषु कलह: उद्भूत: ।
२. ______ (६) बिडालै: एक: एव मूषक: दृष्ट: ।
३. ______ (७) दीपानाम् एका आवलि: गृहे दृश्यते ।
४. ______ (९) रात्रीणां समूह: नाम नवरात्रम् ।
५. अपि जानासि ______ (७) ऋषीणां नामानि ?
६. कार्तिकेय: ______ (६) मुखै: वदति किम् ?
७. रावणस्य ______(१०)मस्तकेभ्य: किरीटा: पतिता: ।
८. ______ (८) लक्ष्मीषु कति नामानि जानासि ?
९. राजा ______ (९) ऋषिभ्य: दानं दत्तवान् ।
१०. ______ (६) वस्तुभ्य: ______ (३) वस्तूनि आवश्यकानि ।
११. अस्माभि: ______ (८) भूपतीनां चरित्राणि पठितानि ।

### सङ्ख्यारूपाणि

| (नित्यं बहुवचनम्) | | | |
|---|---|---|---|
| **षष्** | **अष्टन्** | **नवन्** | **विभक्ति:** |
| षट्/षड् | अष्ट / अष्टौ | नव | प्रथमा |
| षट्/षड् | अष्ट / अष्टौ | नव | द्वितीया |
| षड्भि: | अष्टभि:/ अष्टाभि: | नवभि: | तृतीया |
| षड्भ्य: | अष्टभ्य:/ अष्टाभ्य: | नवभ्य: | चतुर्थी |
| षड्भ्य: | अष्टभ्य:/ अष्टाभ्य: | नवभ्य: | पञ्चमी |
| षण्णाम् | अष्टानाम् | नवानाम् | षष्ठी |
| षट्सु/ षट्त्सु | अष्टसु/ अष्टासु | नवसु | सप्तमी |